A

911

# SAMAGRA SHIKSHA, KERALA

## First Terminal Evaluation - 2023-24

First Language Part I- Paper-I

## SANSKRIT- Part-1

(For Academic and Oriental Sanskrit Schools)

**Class- IX**

Time 1 ½ Hours — Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

क) केषां भाषितं पुनरुक्तं न भवति?

(सज्जनानाम्, समर्थानाम्, अलसानाम्, दुष्टानाम्)

ख) किं गणे नान्तर्भवति?

(रघुवंशम्, रामायणम्, नैषधीयचरितम्, शिशुपालवधम्)

ग) 'हुतभुक्' इत्यर्थकं पदं किम्?

(अग्निः, वायुः, जलम्, आकाशम्)

घ) राक्षसानां प्रवरः कः?

(सुग्रीवः, मारुतिः, रावणः, जाम्बवान्)

ङ) 'रक्षणोपायः अस्ति। जलाशयान्तराश्रयणम्' - कस्य वचनमिदम्?

(मत्स्यस्य, कर्कटकस्य, कैवर्तकस्य, बकस्य)

**2. पट्टिकां पूरयत।** 4x1=4

| कृतिः | कर्ता | विभागः |
|---|---|---|
| बृहत्कथा | गुणाढ्यः | ................ |
| बालिद्वीप् | .............. | सञ्चारसाहित्यम् |
| ................ | वाल्मीकिः | इतिहासः |
| हितोपदेशः | ................ | कथासाहित्यम् |

3. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

क) भो झष! आगच्छ। भवन्तम् अहं नयामि।

4. उदाहरणानुसारं सन्धिच्छेदं लिखत। 1x1=1

उदा- महत्येव - महति + एव।

क) भवत्येव - .......... + ........।

5. उदाहरणानुसारं विग्रहवाक्यं लिखत। 1x1=1

उदा- पाञ्चाली - पाञ्चालस्य अपत्यं स्त्री ।

क) जानकी - ............................................।

6-10 अधोदत्तेभ्यः प्रश्नेभ्यः चतुर्णाम् उत्तरं लिखत। 4x2=8

6. अधोदत्तं श्लोकं पठित्वा गद्यक्रमं लिखत।

स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ।।

गद्यक्रमः- मारुतिः तस्य भवनस्य मध्ये ............ चित्रगृहान् निशागृहान् ............।
सीतां प्रति दर्शनोत्सुकः सः ............... तां च न ............. एव।

7. 'बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं करोति ' इति आशययुक्तं सुभाषितं चित्वा लिखत।

क) तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ।।

ख) कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ।।

8. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदाः -ज्येष्ठः वृक्षान् रोपयति। ज्येष्ठः वृक्षान् अरोपयत्

क) अनुजः वृक्षान् सिञ्चति। ........................... ।

9. उदाहरणानुसारं 'न केवलं - अपि तु' उपयुज्य वाक्यं परिवर्तयत।

उदाः - सुभाषितपठनं करणीयम्। जीवने आचरणीयम्।

न केवलं सुभाषितपठनं करणीयम् अपि तु जीवने आचरणीयम्।

क) वृक्षाः रोपणीयाः भवन्ति। ते सम्यक् परिपालनीयाः भवन्ति।

10. अधोदत्तं वाक्यं पठित्वा ल्यबन्तम्-तुमुन्नन्तम् च चित्वा लिखत।

छात्राः चित्राणि दृष्ट्वा कथां विलिख्य अवतारयितुम् प्रयतन्ते।

**11-13 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।** **2x4=8**

**11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

स चिन्तयामास ततो महाकपिः
प्रियामपश्यन् रघुनन्दनस्य ताम्।
ध्रुवं हि सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली।।

क) श्लेकात् किमपि क्रियापदं चित्वा लिखत।

ख) श्लोके '**निश्चयेन**' इत्यर्थे प्रयुक्तं पदं किम्?

ग) अधोरेखाङ्कितपदस्य पदच्छेदं लिखत।

घ) सीता ध्रुवं म्रियते इति कः चिन्तयामास?

**12. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

कण्णूर् जिल्लायां लब्धजन्मा संस्कृतपण्डितः भवति उत्तमन् के. एम् महोदयः। अनेन संस्कृतभाषायां विरचितं काव्यं भवति ' पितामहीयम् ' । एकादशेषु सर्गेषु विभक्ते अस्मिन् महाकाव्ये 840 श्लोकाः सन्ति। उत्तरकेरलीयानां प्रत्यक्षदेवतारूपेण समाराधितस्य 'मुत्तप्पन्' इति देवस्य चरितम् ऐतिह्यानां बलेन अत्र प्रतिपादितम्।सर्वेषां पद्यानाम् अन्वयः अन्वयार्थश्च ग्रन्थकारेणैव कृत्वा कैरल्यां प्रसिद्धीकृतः भवति।

क) 'पितामहीयं' नाम काव्यं केन विरचितम् ?

ख) पितामहीये कति श्लोकाः सन्ति?

ग) खण्डिकातः क्त्वान्तम् अव्ययं चित्वा लिखत।


घ) पितामहीये कस्य चरितम् उपवर्णितं भवति?

**13. उदाहरणानुसारं कोष्ठकस्थानि पदान्युपयुज्य वाक्यगोपुरं रचयत।**

उदा-




क)




सुन्दरं
जीजा
रचयति
चित्रं
वनस्य

14. संभाषणं प्रादेशिकभाषया विवर्तयत। 1x5=5

छात्र: - नमस्ते आचार्य! संस्कृतदिनम् अस्मिन् वर्षे कदा भवति

अध्यापक: - नमस्ते। प्रतिवर्षं श्रावणपूर्णिमायां भवति।

छात्र: - संस्कृतदिने के के कार्यक्रमाः आयुज्यन्ते?

अध्यापक: - कार्यक्रमान् भवन्तः एव चिन्तयन्तु।

छात्र: - वयं मिलित्वा चिन्तयामः।

15-17 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत । 2x4=8

15. सूचनाः उपयुज्य सुभाषितोक्तरीत्या सज्जनस्वभावम् अधिकृत्य लघूपन्यासं लिखत।

सूचनाः- बाल्यकालः - उपकारः - नारिकेलवृक्षः - अमृतकल्पं सलिलं -सज्जनाः - प्रत्युपकारं कुर्वन्ति।

16. सूचनाः उपयुज्य लघुविवरणं लिखत।

सूचनाः - रामायणम् - सप्तकाण्डाः - सुन्दरकाण्डः- हनुमान् - निरन्तरप्रयत्नः - आत्मविश्वासः - विजयः।

17. सम्भाषणांशान् पूरयत।

कुलीरः - हे बक! किम् भवान् चिन्ताकुलः इव दृश्यते?

बकः - ............... ! मम दैन्यावस्थां विचिन्तयामि।

कुलीरः - दैन्यावस्थायाः ..................................?

बकः - मत्स्याः मम जीवनहेतवः । इदानीं........... न लभ्यन्ते।

कुलीरः - मत्स्यानां किम् अभवत्?

बकः - .................................।

कुलीरः - धीवराः मत्स्यान् गृह्णन्ति चेत् भवान् अन्यं जलाशयं गच्छतु।

बकः - वार्धक्येन तदपि न शक्यते।

>>> <<<